# Shri Parabrahmashakti athavA parashaktisahasranAmastotram

# શ્રીપરબ્રહ્મશક્તિ અથવા પરશક્તિસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : Parabrahmashakti or parashaktisahasranAmastotram

File name : parabrahmashaktisahasranAmastotram.itx

Category : devii, devI, sahasranAma

Location : doc_devii

Transliterated by : Durga Sharma

Proofread by : Durga Sharma

Latest update : June 3, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 2, 2026

*sanskritdocuments.org*

# શ્રીપરબ્રહ્મશક્તિ અથવા પરશક્તિસહસ્રનામસ્તોત્રમ્

આનન્દભૈરવ્યુવાચ -
ભગવન્ સર્વતત્વજ્ઞ સર્વસિદ્ધેશ્વરેશ્વર ।
રહસ્યં પરમાનન્દં બ્રૂહિ મે કરુણાનિધે ॥ ૧॥

યન્નામકીર્તનાન્મર્ત્યો જીવન્મુક્તો ભવેત્ક્ષણાત્ ।
પરં બ્રહ્મ વિજાનીયાત્ તન્મે કથય સુવ્રત ॥ ૨॥

આનન્દભૈરવ ઉવાચ -
શૃણુ દેવિ પ્રક્ષ્યામિ પરં તત્ત્વમનુત્તમમ્ ।
રહસ્યાનાં રહસ્યં ચ સર્વમન્ત્રૌઘમૂર્ધજમ્ ॥ ૩॥

પરબ્રહ્મચૈતન્યસહસ્રનામસંજ્ઞિતમ્ ।
દિવ્યં ગુહ્યાતિગુહ્યં ચ દેવૈરપિ સુદુર્લભમ્ ॥ ૪॥

અસ્ય શ્રીપરબ્રહ્મચૈતન્યસહસ્રનામસ્તોત્રમન્ત્રસ્ય
આદિપુરુષપ્રકૃતિરમૃતં ઋષિઃ, ગાયત્ર્યનુષ્ટુપ્છન્દઃ,
સર્વવ્યાપી પરબ્રહ્મશક્તિર્દેવતા, પ્રણવઃ બીજમ્, લજ્જાબીજં શક્તિઃ,
વાગ્ભવબીજં કીલકમ્, કૂર્ચબીજં અસ્ત્રમ્, સોઽહમિતિ કવચમ્,
આત્મજ્ઞાનપ્રયોજનસિદ્ધ્યે વિનિયોગઃ ॥

પ્રણવં સમુપોચ્ચાર્ય લજ્જાબીજં તતઃ પરમ્ ।
એષા પરબ્રહ્મકુલૂકા સર્વતન્ત્રેષુ ગોપિતા ॥ ૫॥

તારં લજ્જાદ્વયં પશ્ચાત્ તારમુચ્ચારયેત્ પુનઃ ।
મુખશોધનમેતત્ સ્યાત્ પરં બ્રહ્મપ્રકાશકમ્ ॥ ૬॥

આદૌ પ્રણવમુચ્ચાર્ય સેતુરુક્તો મનીષિભિઃ ।
મહાસેતુસ્તથૈવોક્તો વર્ણભેદેન ગોપિતઃ ॥ ૭॥

વિપ્રાણાં પ્રણવઃ સેતુઃ ક્ષત્રિયાણાં તથા શ્રુતિઃ ।
બીજં માયામયમુદ્દિષ્ટં વૈશ્યાનાં કીર્તિતં પુરા ॥ ૮॥

શૂદ્રાણાં વાગ્ભવં બીજં મહાસેતુરયં સ્મૃતઃ ।
એવં ન્યાસં પુરા કૃત્વા સ્તોત્રરાજં પઠેન્નરઃ ॥ ૯॥

અઙ્ગુષ્ઠયોર્ન્યસેત્ તારં તર્જન્યોર્ગ્રાહ્યમાયયા ।
મધ્યમયોશ્ચ વાગ્બીજં કૂર્ચબીજં ત્વનામિકોઃ ॥ ૧૦॥

કનિષ્ઠયોર્ન્યસેદસ્ત્રં કરતલકરપૃષ્ઠયોઃ ।
એવમેવ હૃદાદ્યઙ્ગેષ્વઙ્ગન્યાસં સમાચરેત્ ॥ ૧૧॥

તતઃ પરં મહાદેવિ વ્યાપકન્યાસમાચરેત્ ।
ૐ સચ્ચિદેકં બ્રહ્મેતિ મન્ત્રેણ ચતુરક્ષરાત્ ॥ ૧૨॥

સૃષ્ટિસ્થિતિલયાકારં ત્રિધા ન્યાસં પૃથક્ પૃથક્ ।
મૂર્ધ્નિ વક્ત્રે ચ હૃદયે નાભૌ ગુહ્યે ચ પાદયોઃ ॥ ૧૩॥

સૃષ્ટિન્યાસં પ્રકુર્વીત બ્રહ્મબુદ્ધ્યા સમાહિતઃ ।
પાદાદિમૂર્ધપર્યન્તં સ્થિતિન્યાસં સમાચરેત્ ॥ ૧૪॥

મૂર્ધ્નાદિપાદપર્યન્તં સંહારન્યાસમુત્તમમ્ ।
કુર્યાત્ સમાહિતમનાઃ પરબ્રહ્મમયો ભવેત્ ॥ ૧૫॥

ધ્યાનં -
કોટિસૂર્યપ્રતીકાશં ચન્દ્રકોટિસુશીતલમ્ ।
અવાઙ્મનસગોચરં શક્તિવ્યાપ્તં જગન્મયમ્ ॥ ૧૬॥

સચ્ચિદાનન્દરૂપં ચ નિર્ગુણં સગુણં પરમ્ ।
ધ્યાત્વા પરબ્રહ્મશક્તિં આત્મજ્ઞાનં વિન્દતિ ક્ષણાત્ ॥ ૧૭॥

## અથ સહસ્રનામસ્તોત્રમ્ ।

ૐ ચિત્પુઞ્જપિણ્ડિતાખણ્ડતેજોરાશિર્જગત્પ્રસૂઃ ।
વ્યોમાતીતપદાન્તસ્થા શૂન્યાશૂન્યવિલક્ષણા ॥ ૧૮॥

નિર્વિકલ્પમહાદીપ્તિર્નિરાકારસમુજ્જ્વલા ।
ભાવશૂન્યા પ્રપઞ્ચાર્તા સત્ત્વમાત્રાવભાસિની ॥ ૧૯॥

અદૃશ્યદૃગ્રૂપધરા ગમ્ભીરાગાધવૈભવા ।
નિસ્તરઙ્ગચિદાભાસા નિષ્પ્રપઞ્ચપરામૃતા ॥ ૨૦॥

અવાચ્યમહિમોપેતા કેવલજ્ઞાનમૂર્તિમતી ।
મૂર્તામૂર્તપરિત્યાગા મહાસંવિન્મયીશ્વરી ॥ ૨૧॥

અનાખ્યેયાત્મસંસ્થાના કૂટસ્થાચલમઙ્ગલા ।
નીલજીમૂતસઙ્કાશવ્યાલવદ્રમ્યકુન્તલા ॥ ૨૨॥

પ્રફુલ્લમીનનેત્રાન્તા સુવક્ત્રા ચારુનાસિકા ।
સહસ્રબાહુવિભવા મન્ત્રસિદ્ધ્યચતુર્ભુજા ॥ ૨૩॥

રાગદ્વેષલસત્પાશા ક્રોધાન્કુશવિમર્દિની ।
મનોભવેક્ષુકોદણ્ડા તન્માત્રકુસુમાયુધા ॥ ૨૪॥

અરુણારુણસઙ્કાશા બાલસૂર્યસમપ્રભા ।
સૂર્યાચન્દ્રમસોદ્ભાસિમુકુટોન્નતશેખરા ॥ ૨૫॥

નખદીપ્તિવિનિર્ધૂતકોટિબ્રહ્માણ્ડમણ્ડલા ।
નખરોમપ્રસૂતાદ્યાનેકકલ્પસુરાસુરા ॥ ૨૬॥

કોટીશવન્દ્યચરણા દુર્ગમાગમપાદુકા ।
કલ્પમન્વન્તરાતીતા મહાકાલવિહારિણી ॥ ૨૭॥

અનૌપમ્યસ્વરૂપા ચ સમાધિકરહિતા સતી ।
સર્વમયી જગત્પૂજ્યા લેપશૂન્યા ચિદમ્બરા ॥ ૨૮॥

અજન્મા જન્મરહિતા પુનરાવૃત્તિવર્જિતા ।
નિમેષોન્મેષનિગ્ધૂતકોટિકાલાતિગાવિની ॥ ૨૯॥

મહોદયી મહાપુણ્યા મહાસત્ત્વા મહોજ્જ્વલા ।
ગુહ્યાતિગુહ્યગોપ્ત્રી ચ સર્વતત્ત્વમયી પરા ॥ ૩૦॥

અનાદિનિધના સ્વસ્થા પરબ્રહ્માત્મિકાદ્યુતિઃ ।
પ્રપઞ્ચશમનોદ્યુક્તા મહાભૈરવવલ્લભા ॥ ૩૧॥

નિષ્કલા નિસ્તુલાનન્તા વિશુદ્ધજ્ઞાનવિગ્રહા ।
ઘોરસંસારવારિધિસન્તારણમહાતરી ॥ ૩૨॥

ચિચ્છક્તિશ્ચિત્સ્વરૂપા ચ પરમાનન્દદાયિની ।
ચિદ્ઘના ચ ચિદાકારા ચિદુલ્લાસા ચિદઞ્ચિતા ॥ ૩૩॥

અમૂર્તા મૂર્તિકાવ્યાપ્તા સર્વસઙ્કલ્પવર્જિતા ।
મહામન્ત્રમયી માતા મહાતન્ત્રપ્રકાશિની ॥ ૩૪॥

વ્યોમવિસ્ફોટસઞ્જાતનાદબ્રહ્મમયી પરા ।
પ્રણવોદ્ધારહૃદયા મહાબિન્દુસમુજ્જ્વલા ॥ ૩૫॥

અકારપ્રથમાભાસા સર્વવર્ણશિરોમણિઃ ।
શબ્દબ્રહ્માત્મિકા દેવી શબ્દમાલાવિભૂષિતા ॥ ૩૬॥

નાદપુઞ્જપરિષ્વઙ્ગા બિન્દુનાદકલાન્તગા ।
ષટ્ત્રિંશત્તત્ત્વસન્દોહા તત્ત્વાતીતા ચિદાશ્રયા ॥ ૩૭॥

શિવશક્તિદ્વયીરૂભા સદાશિવપદોન્મુખી ।
ઈશ્વરત્વવિધાત્રી ચ શુદ્ધવિદ્યામયીશ્વરી ॥ ૩૮॥

માયામયતરોર્બીજં કલાકાલવિભેદિની ।
નિયત્યર્ગલસંરુદ્ધા વિદ્યાવિદ્યાપ્રકાશિની ॥ ૩૯॥

રાગરાગિણિચિત્સંસ્થા પુરુષત્વવિધાયિની ।
પ્રકૃતિપ્રસવાભિખ્યા ગુણત્રયવિભાવિની ॥ ૪૦॥

મહત્તત્ત્વમહાદીપ્તિરહઙ્કારવિકારિણી ।
મનોબુદ્ધીન્દ્રિયપ્રાણા પઞ્ચતન્માત્રમૂર્તિમતી ॥ ૪૧॥

સ્થૂલભૂતપરિચ્છિન્ના વિપ્રવિસ્ફોટકારિણી ।
બ્રહ્મમયી બ્રહ્મરૂપા પરબ્રહ્મપ્રકાશિની ॥ ૪૨॥

ભગવતી ભગાઢ્યા ચ ભગરૂપપ્રપઞ્ચિની ।
ભગવાનિતિ શબ્દાર્યા ભગાસનસુસંસ્થિતા ॥ ૪૩॥

પરમાત્મા પરં જ્યોતિઃ પરમાત્માક્ષરપ્રસૂઃ ।
ઈશ્વરી ચેશ્વરાખ્યાતા સર્વેશ્વરહૃદાશ્રયા ॥ ૪૪॥

કૂટસ્થા સ્વપ્રકાશા ચ સર્વવ્યાપિપરાન્વિતા ।
જગદ્વીજબીજભૂતા બીજશૂન્યા સનાતની ॥ ૪૫॥

મહામાયા મહાવિદ્યેત્યુચ્ચાર્યા વાચ્યવર્જિતા ।
ચિત્પ્રકાશા ચિદાહ્લાદા સચ્ચિદાનન્દવિગ્રહા ॥ ૪૬॥

નાદરૂપરસસ્પર્શગન્ધશબ્દાતિશાયિની ।
મહાકારણરૂપા ચ કાર્યકારણવર્જિતા ॥ ૪૭॥

સર્વશૂન્યા સર્વપૂર્ણા સર્વસત્ત્વસમાશ્રયા ।

વિશ્વોત્પત્તિલયોન્મેષા વિશ્વપાલનતત્પરા ॥ ૪૮॥

કાલરાત્રિકલાતીતા મહાકાલકલામયી ।
અક્ષરાક્ષરસમ્બન્ધા ક્ષરાક્ષરવિલક્ષણા ॥ ૪૯॥

સર્વજ્ઞા સર્વકર્ત્રી ચ સર્વશક્તિસમન્વિતા ।
અનિર્વાચ્યાપરાનન્દા સચ્ચિદેકરસાત્મિકા ॥ ૫૦॥

ઇચ્છાજ્ઞાનક્રિયાશક્તિત્રિવેણીસઙ્ગમોજ્જ્વલા ।
ચિત્પ્રભા ચિત્કલા ચિન્મયી સંવિદુન્મેષતારિણી ॥ ૫૧॥

સન્ધિન્યાધારસમ્પૂતા હ્લાદિનીહ્લાદવર્ધિની ।
આહ્લાદિની મહાહ્લાદા હ્લાદનાનન્દદાયિની ॥ ૫૨॥

ઋક્પ્રપઞ્ચજટાજૂટા યજુઃસામવિભાવિની ।
અથર્વાઙ્ગિરસામ્ભોધિઃ ષડઙ્ગશ્રુતિભૂષિતા ॥ ૫૩॥

ઉપવેદકલાધારા પુરાણપ્રસવોન્મુખી ।
ઇતિહાસમહાકાયા મીમાંસાદ્વયલોચના ॥ ૫૪॥

ષડ્દર્શનમહાહંસા ન્યાયવૈશેષિકારણિઃ ।
આગમેન્દ્રમહામઞ્ચા તન્ત્રમન્ત્રૈકસેતુકા ॥ ૫૫॥

મન્ત્રબીજપ્રકાશા ચ યન્ત્રરાજપ્રતિષ્ઠિતા ।
નવધાભક્તિગમ્ભીરા પ્રેમપીયૂષવાહિની ॥ ૫૬॥

વૈષ્ણવી વિષ્ણુરુપસ્થા શાક્તા શાક્તજનપ્રિયા ।
શૈવી શિવપદારાધ્યા ગાણપત્યમહોદયા ॥ ૫૭॥

સૌરલોકમહાદીપ્તિઃ કૌમારી ગુહમાનસા ।
ઐન્દ્રી મરુદ્ધૃતા સ્માર્તા કૌલિકાચારવર્ધિની ॥ ૫૮॥

જૈનસત્ત્વમયી શુદ્ધા બોધિસત્ત્વૈકવિગ્રહા ।
સારસ્વતપ્રવાહા ચ વૈદિકાચારમઙ્ગલા ॥ ૫૯॥

વામાચારરહસ્યસ્થા દક્ષિણાચારદીપિકા ।
સમયાચારસન્તુષ્ટા સમયાન્તર્વિહારિણી ॥ ૬૦॥

મિશ્રાચારમહાવેગા મ્લેચ્છાચારવિમર્દિની ।
સર્વતન્ત્રમયી સ્વચ્છા સર્વમન્ત્રમયી પરા ॥ ૬૧॥

પ્રકૃતિપ્રલયાનન્દા મહાપુઙ્ખાનુપુઙ્ખિકા ।
નામશતમહોલ્લાસા બ્રહ્મચૈતન્યવાહિની ॥ ૬૨॥

ચાતુર્વર્ણ્યમયી ચક્રી વર્ણાશ્રમવિભાવિની ।
બ્રહ્મચર્યવ્રતાધારા ગૃહમેધિપ્રિયાવહા ॥ ૬૩॥

વાનપ્રસ્થાશ્રમાવાસા સન્ન્યાસોલ્લાસવિગ્રહા ।
સ્ત્રીરૂપા પુંસ્વરૂપા ચ નપુંસકપદસ્થિતા ॥ ૬૪॥

અપ્સરોગણસઙ્ગીતા યક્ષયક્ષિણિસેવિતા ।
બ્રહ્મરાક્ષસસંહર્ત્રી બ્રહ્મપિશામવિમર્દિની ॥ ૬૫॥

ભૂતવેતાલકૌતુકા કૂષ્માણ્ડગણમાતૃકા ।
શાકિનીડાકિનીલોલા હાકિનીચક્રવર્તિની ॥ ૬૬॥

કાકિનીલાકિનીમૂર્તી રાકિનીયાકિનીમયી ।
મૂલાધારાબ્જમધ્યસ્થા સ્વાધિષ્ઠાનવિહારિણી ॥ ૬૭॥

મણિપૂરપ્રકાશા ચ અનાહતધ્વનિમયી ।
વિશુદ્ધિચક્રનિલયા આજ્ઞાપદ્મનિવાસિની ॥ ૬૮॥

સહસ્રારમહારમ્ભા ષટ્ચક્રભેદભેદિની ।
દશનાખ્યોત્થવિષ્ણુશ્રીર્દશવિદ્યામહોદયા ॥ ૬૯॥

મન્દસ્મિતવિનિર્માતકોટિકોટીશમણ્ડલા ।
ગાત્રકમ્પમહાકમ્પવિસ્ફૂર્જજ્જગદણ્ડકા ॥ ૭૦॥

રુદિતોત્પાદિતન્યક્પ્રલયાકાલપ્રભઞ્જની ।
નિત્યનૈમિત્તિકાત્યન્તપ્રલયાર્ણવતારિણી ॥ ૭૧॥

મહાસંહારઝઞ્ઝા ચ મહાકલ્પાવસાનિકા ।
ષોડશસંસ્કૃતાકારા ગર્ભાધાનશુભોદયા ॥ ૭૨॥

પુંસવનસ્વરૂપસ્થા સીમન્તોન્નયનપ્રિયા ।
જાતકર્મમયી દીપ્તિર્નામકરણભૂષિતા ॥ ૭૩॥

નિષ્ક્રમણમહોત્સાહા અન્નપ્રાશનહર્ષિણી ।
ચૂડાકર્મમયી દેવી કર્ણવેધવિધાયિની ॥ ૭૪॥

ઉપનયનવેદાઢ્યા સમાવર્તનમઙ્ગલા ।
વિવાહવ્રતસમ્પૂર્ણા અન્ત્યેષ્ટિસંસ્કૃતાક્ષરા ॥ ૭૫॥

દીક્ષામયી દીક્ષયિત્રી ગુરુમન્ત્રપ્રકાશિની ।
ગુરુસ્વરૂપા ગુરુગા ગુરુગમ્યા ગુહાશ્રયા ॥ ૭૬॥

યજ્ઞરૂપા યજ્ઞભોક્ત્રી યજમાનસ્વરૂપિણી ।
યજ્ઞકર્ત્રી યજ્ઞસિદ્ધા મહાયજ્ઞફલપ્રદા ॥ ૭૭॥

મદનમોહનમોહાર્દ્રા મહામન્મથમોહિની ।
રાધાપ્રિયા રાધિકા ચ ષડક્ષરી રસાત્મિકા ॥ ૭૮॥

પરમાણુપ્રમાણસ્થા બ્રહ્માણ્ડપરમાવધિઃ ।
મન્દસ્મિતવિનિર્જીવશિવજીવનદાયિની ॥ ૭૯॥

સ્વતન્ત્રા ચ સ્વતન્ત્રોત્થા સ્વચ્છન્દામિતશક્તિકા ।
સૃષ્ટિકર્ત્રી સૃષ્ટિરૂપા સૃષ્ટિપાલનતત્પરા ॥ ૮૦॥

સંહર્ત્રી સંહૃતિમુખા તિરોધાનવિધાયિની ।
અનુગ્રહપ્રદા નિત્યા પઞ્ચકૃત્યધુરન્ધરા ॥ ૮૧॥

પ્રત્યાયકલનાયજ્ઞરાવણાન્વયનાશિની ।
દાક્ષાયણી દક્ષયજ્ઞવિનાશાતિભયઙ્કરી ॥ ૮૨॥

આત્મવિદ્યા બ્રહ્મવિદ્યા મહાવિદ્યા મહેશ્વરી ।
ષોડશાક્ષરમન્ત્રાઢ્યા પઞ્ચદશ્યક્ષરાવલિઃ ॥ ૮૩॥

શ્રીવિદ્યા શ્રીમયી શ્રીદા શ્રીમતી ત્રિપુરસુન્દરી ।
ગઙ્ગા યમુનાવર્તાના નર્મદા ગણ્ડકી નદી ॥ ૮૪॥

સરસ્વતી સિન્ધુકન્યા ગોદાવરી તરઙ્ગિણી ।
કાવેરી સરયૂ કૃષ્ણા ચન્દ્રભાગા મહાનદી ॥ ૮૫॥

સર્વતીર્થમયી શુદ્ધા તીર્થરાજપ્રતિષ્ઠિતા ।
મહાજલૌઘગમ્ભીરા જગત્પાવનપાવની ॥ ૮૬॥

નિષ્કમ્પદીપરૂપા ચ મહાભૈરવસાક્ષિણી ।
સ્વપ્રકાશચિદાનન્દા પરબ્રહ્માવભાસિની ॥ ૮૭॥

અષ્ટાઙ્ગયોગનિરતા યમનિયમમૂર્તિમતી ।
આસનપ્રાણસંરોધા પ્રત્યાહારપ્રકાશિની ॥ ૮૮॥

ધારણાધ્યાનમગ્ના ચ સમાધિસમવિગ્રહા ।

ક્રિયાયોગમયી ક્ષેમ્યા હઠયોગવિશારદા ॥ ૮૯॥

રાજયોગમહાપીઠા લયયોગતરઙ્ગિણી ।
જ્ઞાનયોગપ્રકાશા ચ ભક્તિયોગમહોદયા ॥ ૯૦॥

કર્મયોગપથાધારા સર્વયોગેશ્વરેશ્વર ।
કુણ્ડલીયોગસન્દોહા નાદયોગસુખપ્રદા ॥ ૯૧॥

વામભાગલસદ્રૂપા પ્રકૃતિઃ પ્રકૃતેઃ પરા ।
દક્ષિણભાગસમ્પૂતા પુરુષઃ પુરુષોત્તમા ॥ ૯૨॥

સ્વયમેવ પરં બ્રહ્મ સચ્ચિદાનન્દલક્ષણમ્ ।
માતા પિતા ચ ભ્રાતા ચ ભગિની બન્ધુરૂપિણી ॥ ૯૩॥

વધૂઃ પુત્રશ્ચ પુત્રી ચ પૌત્રપૌત્રીકુલાકુલા ।
વંશકૃદ્ વંશરૂપા ચ વંશનાશનનાશિની ॥ ૯૪॥

સુમુખી ચ સમુખી ચ ત્રિપાદ્ગાયત્રીરૂપિણી ।
માતઙ્ગી રાજયશ્યામાલા સર્વમન્ત્રવશઙ્કરી ॥ ૯૫॥

વિષ્ણુરૂપા વિષ્ણુશક્તિર્મધુસૂદનમર્દિની ।
સર્વવેદાન્તતાત્પર્યા સર્વદર્શનગોચરા ॥ ૯૬॥

શબ્દાર્થગ્રન્થસન્દોહા કવિકલ્પલતા શુભા ।
અભેદા ભેદરૂપા ચ ભેદાભેદવિલક્ષણા ॥ ૯૭॥

પરાનન્દામૃતોત્સેકા ચિદ્વિલાસતરઙ્ગિણી ।
પરબ્રહ્મચૈતન્યદીપ્તિઃ સર્વમઙ્ગલમઙ્ગલા ॥ ૯૮॥

કુબ્જિકા કુબ્જરૂપા ચ કુલૂકા કુલનાયિકા ।
કુરુકુલ્લા કરાલા ચ કરાલવદના શુભા ॥ ૯૯॥

કાલિકા કાલકાન્તા ચ કાલકૂટવિમર્દિની ।
કદમ્બવનવાસસ્થા કદમ્બકુસુમોત્સુકા ॥ ૧૦૦॥

કદમ્બમાલાલઙ્કારા કાદમ્બરીમદાલસા ।
પરબ્રહ્મસૂત્રધરા પરબ્રહ્મમયી સતી ॥ ૧૦૧॥

પરબ્રહ્મમહાબિન્દુસિન્દૂરતિલકોજ્જ્વલા ।
સ્વકીયભર્તૃરૂપા ચ સ્વયં વૈ પતિરૂપિણી ॥ ૧૦૨॥

સ્વપત્યભેદસંસિદ્ધા સ્વશક્ત્યૈકાત્મવિગ્રહા ।
મહાત્રિપુરસુન્દર્યા મહાસામ્રાજ્યશાલિની ॥ ૧૦૩ ॥

ચતુઃષષ્ટિકલામયી કલાતીતા કલાનિધિઃ ।
સિંહાસનસમારૂઢા રાજરાજેશ્વરી પરા ॥ ૧૦૪ ॥

બિન્દુચક્રકૃતાવાસા નવચક્રક્રમોન્મુખી ।
ત્રૈલોક્યમોહનચક્રપ્રકટિતાક્ષરમાલિકા ॥ ૧૦૫ ॥

સર્વાશાપરિપૂરસ્થા સર્વસઙ્ક્ષોભિણી તથા ।
સર્વસૌભાગ્યદાયિત્રી સર્વાર્થસાધિકોજ્જ્વલા ॥ ૧૦૬ ॥

સર્વરક્ષાકરાકારા સર્વરોગહરાક્ષરા ।
સર્વસિદ્ધિપ્રદા દેવી સર્વાહ્લાદમયી પરા ॥ ૧૦૭ ॥

મહાકુણ્ડલિનીશક્તિઃ પરમાનન્દલહરી ।
સુધામયપ્રવાહા ચ ચન્દ્રમણ્ડલવર્તિની ॥ ૧૦૦ ॥

મહામયૂખકલિતા મહાતેજોમયીશ્વરી ।
સર્વવેદાન્તનિલયા સર્વસઙ્કલ્પવર્જિતા ॥ ૧૦૯ ॥

અચિન્ત્યદિવ્યમહિમા વાઙ્મનસાતિગાવિની ।
નિત્યશુદ્ધા બુદ્ધરૂપા પરબ્રહ્મપ્રકાશિની ॥ ૧૧૦ ॥

ચિદાકાશમહાગર્ભા મહાશૂન્યવિહારિણી ।
અનન્તકોટિબ્રહ્માણ્ડભાણ્ડસ્પન્દનકારિણી ॥ ૧૧૧ ॥

મહાકલ્પાગ્નિસન્દોહા મહાપ્રલયનર્તિકી ।
મહાકાલગ્રસત્પ્રાણા સર્વગ્રાસમહોત્સવા ॥ ૧૧૨ ॥

વિનાશતુલનારહિતા સર્વોત્પત્તિવિવર્જિતા ।
નિરાધારપ્રતિષ્ઠા ચ સ્વપ્રતિષ્ઠા પરાત્પરા ॥ ૧૧૩ ॥

અતીતાનાગતજ્ઞાના વર્તમાનપ્રકાશિની ।
ત્રિકાલજ્વાલામુકુટા ત્રિકાલભુવનેશ્વરી ॥ ૧૧૪ ॥

અદેશકાલપરિચ્છિન્ના સર્વદેશમયી સતી ।
અમૂર્તા મૂર્તસઙ્ઘાતા વ્યક્તાવ્યક્તસ્વરૂપિણી ॥ ૧૧૫ ॥

અનાદ્યન્તચિદાભાસા મધ્યશૂન્યા મહોદયા ।
મહારહસ્યમન્ત્રાઢ્યા ગૂઢગુહ્યતમપ્રભા ॥ ૧૧૬ ॥

નિરઞ્જના નિર્ગુણા ચ નિષ્કલા નિરુપદ્રવા ।
નિર્વિકારા નિરાકારા નિર્વિકલ્પા નિરામયા ॥ ૧૧૭॥

અમેયમહિમા દેવી પ્રમાણજ્ઞાનવર્જિતા ।
પ્રમાતૃરૂપા પ્રમેયા પ્રમિતિપ્રસવોન્મુખી ॥ ૧૧૮॥

મહામહોપાધ્યાયપ્રિયા વેદવેદાઙ્ગપારગા ।
શાસ્ત્રાર્થજલ્પજલ્પસ્થા વાદજલ્પવિમર્દિની ॥ ૧૧૯॥

સિદ્ધસેવ્યા સિદ્ધમયી સિદ્ધસઙ્ઘપ્રમોદિની ।
મહાસિદ્ધેશ્વરપ્રાણા સિદ્ધિવિજ્ઞાનદાયિની ॥ ૧૨૦॥

સ્વયમ્ભૂઃ સ્વપ્રકાશસ્થા સ્વકીયાનન્દવાહિની ।
પરબ્રહ્મરસામ્ભોધિઃ પરબ્રહ્મમયોત્તમા ॥ ૧૨૧॥

અકારરૂપા પ્રથમા આદ્યશક્તિરનાકુલા ।
ઇકારમન્મથકલા ઈશ્વરીપદમઙ્ગલા ॥ ૧૨૨॥

ઉકારવીર્યવિભવા ઊરુવેગવિહારિણી ।
ઋકારમન્ત્રમૂર્તા ચ ૠકારવર્ણમાતૃકા ॥ ૧૨૩॥

ઌકારતન્ત્રસંસિદ્ધા ૡકારભૈરવી પરા ।
એકારૈકારપીઠસ્થા ઓકારૌકારરૂપિણી ॥ ૧૨૪॥

અઙ્કારબિન્દુમધ્યસ્થા અઃકારપરમક્ષરા ।
કાદિહાદિમહાન્તસ્થા કાદિમન્ત્રાર્થભાવિની ॥ ૧૨૫॥

અકારાદિક્ષકારાન્તસર્વવર્ણસ્વરૂપિણી ।
વર્ણમાલામહાભૂષા નાદપુઞ્જવિલાસિની ॥ ૧૨૬॥

આકાશમાતૃકા મુખ્યા આનન્દામૃતવાહિની ।
ઇચ્છાશક્તિપ્રકાશા ચ ઈહાશૂન્યપદે સ્થિતા ॥ ૧૨૭॥

ઉત્પત્તિસ્થિતિસંહારમૂલભૂતા ઉમા સતી ।
ઊર્ધ્વરેતોમહાદીપ્તિરૂર્ધ્વચક્રવિભેદિની ॥ ૧૨૮॥

ઋષિવન્દ્યા ઋજુપ્રજ્ઞા ૠતાવૃદ્ધિવિધાયિની ।
ઌતુલ્યશૂન્યસંસ્થા ચ એકવીરામહોદયા ॥ ૧૨૯॥

ઐશ્વર્યદાત્રી ઐશાની ઓજોરાશિઃ ઓષધીશઃ ।

ઔદાર્યનિલયા ઔગ્ર્યનાશિની અનુત્તમા ॥ ૧૩૦॥

અન્તર્મુખજનારાધ્યા અન્ધકારવિનાશિની ।
અક્ષરપ્રસવિત્રી ચ અક્ષરાતીતગાવિની ॥ ૧૩૧॥

સર્વવર્ણમયી સ્વચ્છા સર્વમન્ત્રાર્થદીપિકા ।
પરબ્રહ્માક્ષરાભાસા પરબ્રહ્મમયીશ્વરી ॥ ૧૩૨॥

કમલા કમનીયા ચ કલ્યાણી કલિકલ્મષા ।
કઠોરકર્મનિર્મુક્યા કરુણારસવાહિની ॥ ૧૩૩॥

ખડ્ગધારિણિદુર્ધર્ષા ખેટકપ્રકટપ્રભા ।
ખગાસનમહાદીપ્તિઃ ખદ્યોતદ્યુતિહાસિની ॥ ૧૩૪॥

ગમ્ભીરાવર્તનાભિસ્થા ગઙ્ગાવર્તતરઙ્ગિણી ।
ગદાધારિણિગન્ધર્વા ગુણિગુહ્યતમાશ્રયા ॥ ૧૩૫॥

ઘણ્ટાનાદમહાહ્લાદા ઘર્ઘરાઘોરનાદિની ।
ઘનસ્તનભરાનમ્રા ઘનશ્યામા ઘનોત્સુકા ॥ ૧૩૬॥

ઙકારવર્ણમધ્યસ્થા ઙસ્વરૂપા ઙમાતૃકા ।
ચતુર્વર્ગપ્રદા ચક્રચચ્ચચ્ચક્રવિહારિણી ॥ ૧૩૭॥

ચન્દ્રમણ્ડલશઙ્કાશા ચણ્ડમુણ્ડવિમર્દિની ।
છત્રચામરસમ્પૂતા ચ્છિન્નમસ્તકમૂર્તિમતી ॥ ૧૩૮॥

જગત્પ્રસૂતિર્જગતી જનાર્દનજનપ્રિયા ।
જાડ્યવિધ્વંસનચતુરા જિતામિત્રા જિતેન્દ્રિયા ॥ ૧૩૯॥

ઝઙ્કારનૂપુરોપેતા ઝઞ્ઝાવાતઝણત્કૃતા ।
ઞકારવર્ણસંસિદ્ધા ઞરૂપા ઞવિભાવિની ॥ ૧૪૦॥

ટઙ્કારબાણહસ્તા ચ ટઙ્કધારિણિટઙ્કિની ।
ઠકારપીઠનિલયા ઠરૂપા ઠમહોદયા ॥ ૧૪૧॥

ડમ ડમરુહસ્તા ચ ડાકિનીડમરુપ્રિયા ।
ઢક્કારવનિબોદ્ધા ચ ઢુણ્ઢિરાજપ્રપૂજિતા ॥ ૧૪૨॥

ણકારવર્ણમૂર્ધસ્થા તાન્ત્રિકી તન્ત્રમન્ત્રિણી ।
તરુણી તાપશમની તામસી તારિણી તથા ॥ ૧૪૩॥

સ્થૂલસૂક્ષ્મમહાકાયા સ્થૈર્યરૂપા સ્થિરા સતી ।
દન્તદીપ્તિવિનિર્ધૂતદૈત્યદાનવદર્પકા ॥ ૧૪૪॥

દુર્ગા દુર્ગાર્તિશમની દુષ્ટદાનવઘાતિની ।
ધનુર્ધારિણિધર્માઢ્યા ધરિણી ધનદાયિની ॥ ૧૪૫॥

નન્દિની નન્દપુત્રા ચ નાગહારવિભૂષિતા ।
નાભિહ્રદમહાવર્તા નિર્ગુણા નિરુપદ્રવા ॥ ૧૪૬॥

પદ્મનાભપ્રિયા પદ્મા પદ્મનેત્રા પદોન્મુખી ।
પઞ્ચપ્રેતાસનાસીના પઞ્ચબાણપ્રમર્દિની ॥ ૧૪૭॥

ફુલ્લપઙ્કજસઙ્કાશા ફેત્કારભૈરવી પરા ।
બન્ધનોન્મોચની બન્ધા બલભદ્રપ્રસૂઃ સતી ॥ ૧૪૮॥

બહુબાહુરુપા સિદ્ધા બાલસૂર્યસમપ્રભા ।
ભવાની ભવરોગઘ્ની ભીમા ભીમવદોજ્જ્વલા ॥ ૧૪૯॥

મધુપ્રિયા મદોન્મત્તા માતઙ્ગી મદિરોન્મુખી ।
મહાલક્ષ્મીર્મહાકાલી મહાસરસ્વતી મયી ॥ ૧૫૦॥

યજ્ઞપ્રિયા યજ્ઞમૂર્તી યજમાનસ્વરૂપિણી ।
યશોદા યમુનાવર્તા યક્ષરાટ્પ્રકટપ્રભા ॥ ૧૫૧॥

રક્તા રક્તામ્બરધરા રક્તદન્તિકા રઞ્જની ।
રમણી રમણીયા ચ રાજરાજેશ્વરી પરા ॥ ૧૫૨॥

લજ્જાબીજપ્રકાશા ચ લલિતા લલિતામ્બિકા ।
લમ્બસ્તનભરાનમ્રા લોકલોચનલોચના ॥ ૧૫૩॥

વસુપ્રદા વસુમતી વરુણા વર્ણિની વરા ।
વાગ્ભવેશી વાગ્મયી ચ વાજપેયફલપ્રદા ॥ ૧૫૪॥

શઙ્ખચક્રગદાહસ્તા શશાઙ્કમુકુટોન્મુખી ।
શ્યામા શ્યામલતન્વાઙ્ગી શ્મશાનનિલયા શિવા ॥ ૧૫૫॥

ષટ્ચક્રભેદિની ષોઢા ષટ્ત્રિંશત્તત્ત્વભૂષિતા ।
ષડઙ્ગશ્રુતિરૂપા ચ ષડામ્નાયમહોદયા ॥ ૧૫૬॥

સરસ્વતી સાગરસ્થા સુભદ્રા સર્વમઙ્ગલા ।
સચ્ચિદાનન્દરૂપા ચ સર્વસિદ્ધેશ્વરેશ્વર ॥ ૧૫૭॥

હંસહીના હંસમૂર્તી હઠયોગવિશારદા ।
હરિપ્રિયા હરારાધ્યા હકારવર્ણવિગ્રહા ॥ ૧૫૮॥

ક્ષકારસઙ્કુટહરા ક્ષમા ક્ષેમઙ્કરી ક્ષિતિઃ ।
ક્ષુત્પિપાસાસ્વરૂપસ્થા ક્ષીરોદાર્ણવકન્યકા ॥ ૧૫૯॥

સર્વવર્ણમહાવ્યાપ્તા સર્વમન્ત્રાર્થદીપિકા ।
પરબ્રહ્માક્ષરાભાસા પરબ્રહ્મમયીશ્વરી ॥ ૧૬૦॥

મનોલેખનલેખસ્થા વિધાત્રી વિશ્વભાગ્યદા ।
સર્વસઙ્કલ્પચિત્રજ્ઞા નિત્યલેખનતત્પરા ॥ ૧૬૧॥

કાદિવિદ્યા હાદિવિદ્યા સાદિવિદ્યા મહોદયા ।
પરમહંસિનીવિદ્યા ચક્ષુર્વિદ્યા સુખપ્રદા ॥ ૧૬૨॥

શુકવિદ્યા શુભાકારા સઞ્જીવનીમહાદ્યુતિઃ ।
મર્મીવિદ્યા મર્મભેત્તા મર્મરહસ્યગોપિતા ॥ ૧૬૩॥

કામરૂપા કામકલા કામચારવિહારિણી ।
યોગિનીપર્વતમધ્યસ્થા યોનિકુણ્ડસુસંસ્થિતા ॥ ૧૬૪॥

યોનિપીઠમહાધારા નીલશૈલનિવાસિની ।
નીલાઞ્ચલવિલાસસ્થા નીલાચલશિરોમણિઃ ॥ ૧૬૫॥

યોનિપીઠપરાપીઠા કામાખ્યા કામદાયિની ।
પ્રસિદ્ધલલિતામ્બિકા મહાવિદ્યા મહેશ્વરી ॥ ૧૬૬॥

ગુપ્તાભિચારા શમની શત્રુસઙ્ઘવિમર્દિની ।
ગુહ્યકાલી ગુહ્યરૂપા ગુહ્યમન્ત્રપ્રકાશિની ॥ ૧૬૭॥

મહાભૈરવમૂર્ધસ્થા મહાકાલેશ્વરાશ્રયા ।
સિદ્ધાસનસમારૂઢા સિદ્ધામૃતતરઙ્ગિણી ॥ ૧૬૮॥

ચિન્મયી ચિત્કલાતીતા ચેતનાચેતનપ્રસૂઃ ।
મહામન્ત્રમયીમાતા મહાતન્ત્રૈકદીક્ષિતા ॥ ૧૬૯॥

સ્વપ્રકાશચિદાભાસા પરબ્રહ્માત્મિકા દ્યુતિઃ ।
જગદુત્પત્તિબીજાઢ્યા સર્વમઙ્ગલમઙ્ગલા ॥ ૧૭૦॥

અખણ્ડાનન્દપીયૂષધારાસારવિવર્ધિની ।

બ્રહ્માણ્ડકોટિસઙ્ક્ષોભકારિણી કાલમર્દિની ॥ ૧૭૧॥

મહાવિદ્યેશ્વરપ્રાણનાડીમણ્ડલચારિણી ।
ચિત્સૂર્યમણ્ડલાન્તસ્થા મહામોહાદ્રિભેદિની ॥ ૧૭૨॥

અચિન્ત્યવ્યક્તરૂપા ચ વ્યક્તલોકમહેશ્વરી ।
નાદબિન્દુકલાતીતા શુદ્ધસંવિત્પ્રકાશિની ॥ ૧૭૩॥

યજ્ઞેશાર્ચિતપાદબ્જા સર્વયજ્ઞફલપ્રદા ।
ત્રિકાલજ્ઞાનસમ્પન્ના ભૂતભવ્યભવત્પ્રસૂઃ ॥ ૧૭૪॥

માયાજાલાવૃતાકારા માયાજાલવિમર્દિની ।
ગુહાતિગુહ્યગન્ધર્વા ગુહ્યમણ્ડલવર્તિની ॥ ૧૭૫॥

અનન્તરશ્મિસન્દોહા મહાતેજઃપ્રસારિણી ।
સ્વપ્રકાશચિદાકાશા સર્વલોકૈકસાક્ષિણી ॥ ૧૭૬॥

ભવબન્ધપ્રશમની ભક્તકલ્યાણકારિણી ।
નામરૂપવિનિર્મુક્તા નામરૂપપ્રકાશિની ॥ ૧૭૭॥

બ્રહ્મવિષ્ણુશિવારાધ્યા બ્રહ્મવિષ્ણુશિવાત્મિકા ।
સર્વશૂન્યાસ્પદસ્થા ચ સર્વલોકમયી પરા ॥ ૧૭૮॥

મહામન્ત્રાર્થમૂર્તા ચ મન્ત્રશક્ત્યુદયપ્રદા ।
અનાહતમહાધ્વાનરઞ્જિતા લોકધારિણી ॥ ૧૭૯॥

મહોદયનિલયા ચ મહાકલ્યાણસન્તતિઃ ।
પરબ્રહ્મચૈતન્યરૂપા પરાપરફલપ્રદા ॥ ૧૮૦॥

અચિન્ત્યાનન્દવિભવા સચ્ચિદાનન્દવિગ્રહા ।
મહામહોદયોત્સિક્તા ચિદ્વિલાસતરઙ્ગિણી ॥ ૧૮૧॥

સર્વવેદાન્તસિદ્ધાન્તા સર્વશાસ્ત્રાર્થદીપિકા ।
સ્વપ્રકાશચિદાભાસા નિરાધારપદસ્થિતા ॥ ૧૮૨॥

કાલચક્રભ્રમેશાની મહાકાલપ્રમર્દિની ।
નિત્યમુક્તા નિત્યસિદ્ધા નિત્યમઙ્ગલદાયિની ॥ ૧૮૩॥

ગુહ્યાતિગુહ્યગોપ્ત્રી ચ ગુહ્યમણ્ડલવર્તિની ।
મહાસંવિન્મયી શુદ્ધા મહાબિન્દુવિભૂષિતા ॥ ૧૮૪॥

જગદુત્પત્તિહેતુસ્થા જગત્પાલનતત્પરા ।
જગત્સંહારરભસા તિરોધાનવિધાયિની ॥ ૧૮૫॥

અનુગ્રહમયી નિત્યા પઞ્ચકૃત્યસમુત્સુકા ।
બ્રહ્મવિષ્ણુશિવેન્દ્રાદિદિવ્યવૈભવદાયિની ॥ ૧૮૬॥

અનાદ્યન્તાપરિચ્છિન્ના સર્વદેશમયી સતી ।
સર્વકાલકલાતીતા સર્વવસ્ત્વવભાસિની ॥ ૧૮૭॥

પરમાર્થૈકસંસિદ્ધા પરમાનન્દલહરી ।
મહાભૈરવસાક્ષિણ્યા મહાભૈરવવલ્લભા ॥ ૧૮૮॥

અવાઙ્મનસગમ્યા ચ શબ્દબ્રહ્માત્મિકા પરા ।
ચિદ્ઘના ચિત્કલા સૂક્ષ્મા સ્થૂલમૂર્તામૂર્તાક્ષરા ॥ ૧૮૯॥

શ્રીપરાપરશક્તિઃ શ્રીમતી પરબ્રહ્માત્મિકા ।
એવં શ્રીપરમબ્રહ્મશક્તિસહસ્રકં જગુઃ ॥ ૧૯૦॥

આનન્દભૈરવ ઉવાચ -
ઇતીદં કથિતં દેવિ રહસ્યાનાં રહસ્યકમ્ ।
પરબ્રહ્મચૈતન્યદં સર્વમન્ત્રૌઘમૂર્ધજમ્ ॥ ૧૯૧॥

ય ઇદં પઠતિ નિત્યં શૃણુતે વાપિ માનવઃ ।
સ સર્વપાપવિનિર્મુક્તો બ્રહ્મસાયુજ્યમાપ્નુયાત્ ॥ ૧૯૨॥

બ્રહ્મહત્યાસહસ્રાણિ જ્ઞાનતોઽજ્ઞાનતોઽપિ વા ।
સ્તોત્રરાજસ્ય પાઠાદ્ધિ નશ્યન્તિ ક્ષણામિષતઃ ॥ ૧૯૩॥

ન તસ્ય દુર્ભિક્ષં દેવિ ન દારિદ્ર્યં ન ભીતયઃ ।
યસ્ય ગેહે તિષ્ઠતીદં સ્તોત્રં દિવ્યં સુગોપિતમ્ ॥ ૧૯૪॥

યત્રૈતત્પઠ્યતે સ્તોત્રં પરબ્રહ્માત્મકં શુભમ્ ।
તત્ર નારાયણઃ શમ્ભુઃ સ્વયં તિષ્ઠતિ સર્વદા ॥ ૧૯૫॥

શત્રવો નાશમાયન્તિ ભૂતપ્રેતપિશાચકાઃ ।
દિશો દ્રવન્તિ ભીતાસ્તાઃ સ્તોત્રધ્વનિસમુત્સુકાઃ ॥ ૧૯૬॥

રાજદ્વારે મહાઘોરે સઙ્ગ્રામે પ્રાણસઙ્કટે ।
આવર્તનેન ચૈતસ્ય જયમાપ્નોતિ નિશ્ચિતમ્ ॥ ૧૯૭॥

કિમત્ર બહુનોક્તેન શૃણુ દેવિ કુલેશ્વરિ ।

સ્તોત્રસ્યાસ્ય પ્રસાદેન જીવન્મુક્તો ભવેન્નરઃ ॥ ૧૯૮॥

ગુરું પ્રપૂજ્ય વિધિવદ્ વસ્ત્રાલઙ્કારચન્દનૈઃ ।
તતઃ સ્તોત્રમિદં ગૃહ્ય સિદ્ધો ભવતિ નાન્યથા ॥ ૧૯૯॥

અદીક્ષિતાય મન્દાય નાસ્તિકાય ખલાય ચ ।
ન દાતવ્યં મહાદેવિ ગોપિતં માતૃજાઇવત્ ॥ ૨૦૦॥

ય ઉદ્દિશ્ય પઠેદ્દેવિ યત્કામં કુરુતે હૃદિ ।
તત્સર્વં સફલં તસ્ય ભવેદેવ ન સંશયઃ ॥ ૨૦૧॥

વિદ્યાર્થી લભતે વિદ્યાં ધનાર્થી લભતે ધનમ્ ।
પુત્રાર્થી લભતે પુત્રં મોક્ષાર્થી મોક્ષમાપ્નુયાત્ ॥ ૨૦૨॥

શનૈશ્ચરાદિદોષઘ્નં સર્વગ્રહનિવારકમ્ ।
દુઃસ્વપ્નશમનં દિવ્યં સર્વસૌભાગ્યવર્ધનમ્ ॥ ૨૦૩॥

ત્રિકાલં યઃ પઠેન્નિત્યં વર્ષમેકં સમાહિતઃ ।
અણિમાદિગુણૈશ્વર્યં સ લભેન્નાત્ર સંશયઃ ॥ ૨૦૪॥

મહાશત્રુપ્રશમનં પરસૈન્યવિમર્દનમ્ ।
રાજવશ્યકરં દિવ્યં સર્વલોકવશઙ્કરમ્ ॥ ૨૦૫॥

યદ્ગૃહે લિખિતં પુસ્તકં પૂજિતં ગન્ધચન્દનૈઃ ।
ન તત્ર બાધતે કશ્ચિદ્ વ્યાધિર્વા મરણાદિકમ્ ॥ ૨૦૬॥

ઇદં સ્તોત્રં મહાગુહ્યં યોગિનીવૃન્દવન્દિતમ્ ।
દેવાનાં દુર્લભં નિત્યં તન્ત્રાણાં સારમુત્તમમ્ ॥ ૨૦૭॥

ગોપનીયં પ્રયત્નેન સ્વયોનિનાવ શઙ્કરિ ।
પ્રકટો ન હિ કર્તવ્યં સામાન્યે ભુવિ માનવે ॥ ૨૦૮॥

યસ્મૈ કસ્મૈ ન દાતવ્યં પરશિષ્યાયાપિ ચ ।
દત્તે ચ વીરહાનિઃ સ્યાત્ સત્યં સત્યં વદામ્યહમ્ ॥ ૨૦૯॥

તસ્માત્સર્વપ્રયત્નેન ગોપ્તવ્યં વીરવન્દિતે ।
પઠનીયં મહાભક્ત્યા પરબ્રહ્મમયો ભવેત્ ॥ ૨૧૦॥

રહસ્યં શ ૃણુ મે દેવિ યદુક્તં તન્ત્રમણ્ડલે ।
સ્તોત્રસ્યાસ્ય પ્રભાવેણ સાક્ષાદ્બ્રહ્મમયો ભવેત્ ॥ ૨૧૧॥

યત્ર યત્ર ચરેન્મર્ત્યો ગૃહીત્વા સ્તોત્રમુત્તમમ્ ।
તત્ર તત્ર મહાદેવી ભૈરવી ભ્રમતિ સ્વયમ્ ॥ ૨૧૨॥

અશ્વમેધસહસ્રાણિ વાજપેયશતાનિ ચ ।
સકૃત્પાઠસ્ય માહાત્મ્યાત્ કલાં નાર્હન્તિ ષોડશીમ્ ॥ ૨૧૩॥

ગઙ્ગાદિદિગ્યતીર્થેષુ યત્ફલં સ્નાનતર્પણૈઃ ।
તત્ફલં લભતે મર્ત્યો ધ્યાત્વા પરપદં પરમ્ ॥ ૨૧૪॥

વારાણસ્યાં કુરુક્ષેત્રે પ્રભાસે પુષ્કરેઽપિ ચ ।
યત્કૃતં સુમહત્પુણ્યં તદસ્ય સ્મરણાદ્ભવેત્ ॥ ૨૧૫॥

અરણ્યે પ્રાન્તરે દુર્ગે સિંહવ્યાઘ્રાકુલે પથિ ।
નાસ્ય વિઘ્નં ભવેત્ક્વાપિ પરબ્રહ્માશ્રિતસ્ય ચ ॥ ૨૧૬॥

શસ્ત્રાણિ નો સ્પૃશન્ત્યેવ વહ્નિર્ન દહતિ ક્ષણાત્ ।
ન મજ્જતિ જલે કશ્ચિદ્ ગ્રન્થેઽસ્મિન્ હૃદિસંસ્થિતે ॥ ૨૧૭॥

તન્ત્રોક્તાઃ સકલાઃ સિદ્ધ્યો મન્ત્રસિદ્ધિસ્તથૈવ ચ ।
કરાઆમલકવત્તસ્ય હસ્તે તિષ્ઠન્તિ સર્વદા ॥ ૨૧૮॥

યસ્ય વક્ત્રે વસેદેતદ્ દિવ્યં નામસહસ્રકમ્ ।
તસ્ય વાક્યં ભવેદ્વેદાઃ સત્યં સત્યં કુલેશ્વરિ ॥ ૨૧૯॥

ન યમસ્ય ભયં તસ્ય ન ચ કાલકૃતં ભયમ્ ।
યઃ પઠેત્ પરમં સ્તોત્રં ચૈતન્યઘનમુજ્જ્વલમ્ ॥ ૨૨૦॥

રહસ્યાતિરહસ્યં ચ પુરશ્ચરણપૂર્વકમ્ ।
યઃ પઠેચ્છ્રદ્ધયા યુક્તો દેવો ભૂત્વા યજેચ્છિવામ્ ॥ ૨૨૧॥

મહાનિશાયાં પૂજાન્તે શ્મશાને વા ચતુષ્પથે ।
એકાન્તે વિજને દેશે સિદ્ધપીઠેષુ વા શિવે ॥ ૨૨૨॥

કૃત્વા ન્યાસવિધિં સર્વં ષોઢાવિસ્તારલક્ષણમ્ ।
જપેત્ સ્તોત્રમિદં ધીમાન્ અષ્ટોત્તરશતં શુભમ્ ॥ ૨૨૩॥

તસ્ય પ્રત્યક્ષમૂર્ત્યા ચ પરબ્રહ્મમયી કલા ।
દદાતિ વાઞ્છિતં સર્વં સિદ્ધત્વં ચિરદુર્લભમ્ ॥ ૨૨૪॥

ખેચરત્વં ભવેત્તસ્ય વાક્સિદ્ધિઃ સર્વકામદા ।
દૃષ્ટિપાતેન મર્ત્યાનાં મોહયેજ્જગતીત્રયમ્ ॥ ૨૨૫॥

આકર્ષણં ચ શત્રૂણાં સ્તમ્ભનં મારણાદિકમ્ ।
યદ્યત્ કરોતિ સઙ્કલ્પં તત્સર્વં સિદ્ધ્યતિ ક્ષણાત્ ॥ ૨૨૬॥

સર્વલોકેષુ પૂજ્યોઽસૌ દેવરાજ ઇવાપરઃ ।
મહાપણ્ડિતસઙ્ઘેષુ વાક્પતિઃ સદૃશો ભવેત્ ॥ ૨૨૭॥

ગુરુવક્ત્રાત્ શ્રુતં સ્તોત્રં ધારયેદ્યો જનઃ સદા ।
તસ્ય હસ્તગતા મુક્તિઃ પરબ્રહ્મપ્રસાદતઃ ॥ ૨૨૮॥

ન તપોભિર્ન દાનૈશ્ચ ન યોગૈશ્ચ ન ચાધ્વરૈઃ ।
તલ્લભ્યતે પરં ધામ યદેતદ્વર્તતે શિવે ॥ ૨૨૯॥

તસ્માત્ સર્વં પરિત્યજ્ય ધ્યાત્વા તદ્બ્રહ્મ શાશ્વતમ્ ।
પઠેત્ સ્તોત્રમિદં દિવ્યં સર્વમન્ત્રૌઘવિગ્રહા ॥ ૨૩૦॥

આનન્દભૈરવ્યુવાચ -
કૃતકૃત્યાઽસ્મિ દેવેશ શઙ્કર પ્રમથાધિપ ।

ઇતિ શ્રીઆનન્દભૈરવભૈરવીસંવાદે શ્રીપરબ્રહ્મશક્તિ અથવા પરશક્તિસહસ્રનામસ્તોત્રકથનં સમ્પૂર્ણમ્ ।

This Stotra was Given by Baba Trijata Aghori
to Swami Nikhileshwarannd (Narayan Dutt Shrimali)
during Tantrik Sammelan.
Source - Swami DivyaChetanananda Book

Encoded and proofread by Durga Sharma

*Shri Parabrahmashakti athavA parashaktisahasranAmastotram*
pdf was typeset on June 2, 2026

Please send corrections to *sanskrit@cheerful.com*